स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः ॥
सस्नेहमस्थि संस्पृश्य सवासाः स्नानमाचरेत् ।
आलभ्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य च ॥
न लङ्घयेत् नरं कृष्णवर्त्मानं दुर्ब्बलं तथा ।
गृहादुच्छिष्टविण्मूत्रपादाम्भांसि क्षिपेद्बहिः ॥
पञ्चपिण्डाननुद्धृत्य न स्नायात् परवारिणि ।
स्नायीत देवखातेषु सरोह्रदसरित्सु च ॥
नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत् कदाचन ।
नालपेज्जनविद्विष्टं वीरहीनां तथा स्त्रियम् ॥
देवतापितृसच्छास्त्रयज्ञसत्रादिनिन्दकैः ।
कृत्वा तु स्पर्शनालापं शुध्यतेऽर्कावलोकनात् ॥
अभोज्याः सूतिकाषण्ढमार्ज्जाराखुश्वकुक्कुटाः
पतितापविद्धनग्नाश्च चाण्डालाद्याधमाश्च ये ॥
सुकेशी उवाच ।
भवद्भिः कीर्त्तिता भोज्या य एते सूतिकादयः ।
अमीषां श्रोतुमिच्छामि तत्त्वतो लक्षणानि च ॥
ऋषय ऊचुः ।
ब्राह्मणी ब्राह्मणश्चैव यावच्छेषत्वमागतौ ।
तावुभौ सूतिकेत्युक्तौ तयोरन्नं विगर्हितम् ॥
न जुहोत्युचिते काले न स्नाति च ददाति च ।
पितृदेवार्च्चनाद्धीनः स षण्ढः परिगीयते ॥
दम्भार्थं जपते यश्च तप्यते यजते तथा ।
न परत्रार्थमुद्युक्तो मार्ज्जारः परिकीर्त्तितः ॥
विभवे सति नैवात्ति न ददाति जुहोति च ।
तमाहुराखुं तस्यान्नं भुक्त्वा कृच्छ्रेण शुध्यति ॥
सभागतानां यः सभ्यः पक्षपातं समाश्रयेत् ।
तमाहुः कुक्कुटं देवास्तस्याप्यन्नं विगर्हितम् ॥
स्वधर्म्मं यः समुत्सृज्य परधर्म्मं समाचरेत् ।
अनापदि स विद्वद्भिः पतितः परिकीर्त्त्यते ॥
वेदत्यागी पितृत्यागी गुरुवह्न्युद्याजकस्तथा ।
गोब्राह्मणस्त्रीवधकृदपविद्धः स उच्यते ॥
येषां कुले न वेदोऽस्ति न शास्त्रं नैव च व्रतम् ।
ते नग्नाः कीर्त्तिताः सद्भिस्तेषामन्नं विगर्हितम् ॥
आशार्त्तानामदाता च दातुश्च प्रतिषेधकः ।
शरणागतं यस्त्यजति स चाण्डालाधमो नरः ॥
यो बान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि ।
कुण्डाशी यश्च अस्यान्नं भुक्त्वा चान्द्रायणं चरेत् ॥
यो नित्यकर्म्मणो हानिं कुर्य्यान्नैमित्तिकस्य च ।
भुक्त्वान्नं तस्य शुध्येत त्रिरात्रोपोषितो नरः ॥
नित्यस्य कर्म्मणो हानिः केवलं मृतजन्मसु ।
न तु नैमित्तिकोच्छेदः कर्त्तव्यो हि कथञ्चन ॥
जाते पुत्त्रे पितुः स्नानं सचेलस्य विधीयते ।
मृते च सर्व्वबन्धूनामित्याह भगवान् भृगुः ॥
प्रेताय सलिलं देयं बहिर्द्दग्ध्वा तु गोत्रजैः ।
प्रथमेऽह्नि चतुर्थे वा सप्तमे वास्थिसञ्चयम् ॥
ऊर्द्ध्वं सञ्चयनात्तेषामङ्गस्पर्शो विधीयते ।
सोदकैस्तु क्रिया कार्य्या संशुद्धैस्तु सपिण्डकैः ॥
विषोद्बन्धनशस्त्राम्बुवह्निपातमृतेषु च ।
तथा गृहीतसन्न्यासे देशान्तरमृते तथा ॥
सद्यःशौचं भवेद्वीर तच्चाप्युक्तं चतुर्व्विधम् ।
गर्भस्रावे तदेवोक्तं पूर्णकाले न वै चरेत् ॥
ब्राह्मणानामहोरात्रं क्षत्त्रियाणां दिनत्रयम् ।
षड्रात्रं चैव वैश्यस्य शूद्राणां द्वादशाह्निकम् ॥
दशद्वादशमासार्द्धं माससंख्यादिनैश्च तैः ।
स्नात्वा कर्म्मक्रियाः कुर्य्युः सर्व्वे वर्णा यथाक्रमम् ॥
प्रेतमुद्दिश्य कर्त्तव्यमेकोद्दिष्टं विधानतः ।
सपिण्डीकरणं कार्य्यं प्रेतस्य वत्सरान्तरे ॥
ततः पितृत्वमापन्ने दर्शपौर्णादिभिः शुभैः ।
प्रीणनन्तस्य कर्त्तव्यं यथाश्रुतिनिदर्शनम् ॥
पितुरर्थं समुद्दिश्य भूमिकोषादिकञ्च यत् ।
कुर्य्याद्येनास्य सुप्रीता पितरो यान्ति राक्षस ॥
यद्यदिष्टतमं किञ्चित् यच्चास्य दयितं गृहे ।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥
अध्येतव्या त्रयी नित्यं भाव्यञ्च विदुषा सदा ।
धर्म्मतो धनमाहार्य्यं यष्टव्यञ्चापि शक्तितः ॥
आचारं कुर्व्वतो नात्मा जुगुप्सामेति राक्षस ।
तत् कर्त्तव्यमशङ्केन यन्न गोप्यं महाजने ॥
एवमाचरतो लोके पुरुषस्य गृहे सतः ।
धर्म्मार्थकामसंप्राप्तिः परत्रेह च शोभना ॥
एष तूद्देशतः प्रोक्तो गृहस्थाश्रम उत्तमः ॥*॥
वानप्रस्थाश्रमं धर्म्मं ते वक्ष्यामोऽवधार्य्यताम् ।
अपत्यसन्ततिं दृष्ट्वा प्राज्ञो देहस्य चायतिम् ।
वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणम् ॥
तत्रारण्योपभोगैन तपोभिश्चात्मकर्षणम् ।
भूमौ शय्या ब्रह्मचर्य्यं पितृदेवातिथिक्रिया ॥
होमस्त्रिसवनस्नानं जटावल्कलधारणम् ।
वन्यस्नेहनिषेवित्वं वानप्रस्थविधिस्त्वयम् ॥*॥
सर्व्वसङ्गपरित्यागो ब्रह्मचर्य्यममानिता ।
जितेन्द्रियत्वमावासे नैकस्मिन् वसते चिरम् ॥
अनारम्भस्तथाहारे भिक्षा विप्रे ह्यनिन्दिते ।
आत्मज्ञानं विवेकश्च तथाह्यात्मावबोधनम् ॥
चतुर्थे चाश्रमे धर्म्मा ह्यस्माभिस्ते प्रकीर्त्तिताः ॥
वर्णधर्म्माणि चान्यानि निशामय निशाचर ॥
गार्हस्थ्यं ब्रह्मचर्य्यञ्च वानप्रस्थं त्रयाश्रमाः ।
क्षत्त्रियस्यापि गदिता य आचारो द्विजस्य हि ॥
वैखानसत्वं गार्हस्थ्यमाश्रमद्वितयं विशः ।
गार्हस्थ्यमुत्तमं त्वेकं शूद्रस्य क्षणदाचर ॥
स्वानि वर्णाश्रमोक्तानि धर्म्माणीह न हापयेत् ।
यो हापयति तस्यासौ परिकुप्यति भास्करः ॥
कुपितः कुलनाशाय देहरोगविवृद्धये ।
वर्णाशु पतते तस्य नरस्य क्षणदाचर ॥
तस्मात् स्वधर्म्मं न हि संत्यजेत
न हापयेच्चापि तथात्मवंशम् ।
यः संत्यजेच्चापि निजं हि धर्म्मं
तस्मै प्रकुप्येत दिवाकरश्च ॥
पुलस्त्य उवाच ।
इत्येवमुक्तो मुनिभिः सुकेशी
प्रणम्य तान् ब्रह्मऋषीन्महर्षीन् ।
जगाम चोत्पत्य पुरं स्वकीयं
मुहुर्मुहुर्धर्म्ममवेक्षमाणः ॥”
इति श्रीवामनपुराणे १४ अध्यायः ॥*॥

अन्यत् पाद्मे स्वर्गखण्डे २८ । ३० । ३१ अध्यायेषु विष्णुपुराणे ३ अंशे ११ अध्याये मार्कण्डेयपुराणे सदाचारनामाध्याये चालोकनीयम् । (सन् साधुराचारो यस्य । सदाचारशीले, त्रि । यथा, कथासरित्सागरे । २ । ७ ।

“कात्यायनो जगादैनमुपविष्टः क्षणान्तरे ।
सदाचारो भवानेवं कथमेतां गतिं गतः ॥”)

सदाचारवान्, [त्] त्रि, सदाचारविशिष्टः । सदाचारी । सदाचारशब्दादस्त्यर्थे वतुप्रत्ययनिष्पन्नः ॥ (यथा, मनुः । ४ । १५८ ।

“सर्व्वलक्षणहीनोऽपि यः सदाचारवान् नरः ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥”

सदातनः, पुं, (सदा भवः । सदा + सायंचिरमिति । ४ । ३ । २३ । इति ट्युल् तुट् च ।) विष्णुः । इति त्रिकाण्डशेषः ॥ नित्ये, त्रि । इत्यमरः ॥ (यथा, भट्टिः । ५ । ६५ ।

“सायन्तनीं तिथिप्रण्यः पङ्कजानां दिवातनीम् ।
कान्तिं कान्त्या सदातन्या ह्रेपयन्ती शुचिस्मिता ॥”)

सदातोया, स्त्री, (सदा तोयं यत्र ।) एलापर्णी । इति शब्दचन्द्रिका ॥ करतोया । इति सदानीराशब्ददर्शनात् ॥

सदादानः, पुं, (सदा दानं मदजलं यस्य ।) ऐरावतः । गणेशः । मत्तहस्ती । इति मेदिनी ॥ नित्यदाने, क्ली ॥

सदानन्दः, पुं, (सदा आनन्दो यस्य ।) शिवः । यथा,—

“सदाशिवः सदाकर्त्ता सदाहर्त्ता सदागतिः ।
सदानन्दः सदावर्त्ता सदासङ्गविवर्ज्जितः ॥”

इति श्रीशिवयामले पार्व्वतीश्वरसंवादे शिवसहस्रनामस्तोत्रम् ॥ सतताह्लादयुक्ते, त्रि । यथा,

“ममानन्दे सदानन्दः सदानन्दो भविष्यति ।
ममानन्दे निरानन्दो निरानन्दो भविष्यति ॥”

इति पुराणे भगवतीवाक्यम् ॥

सदानर्त्तः, पुं, (सदा नृत्यतीति । नृत् + अच् ।) खञ्जनपक्षी । इति शब्दचन्द्रिका ॥ सर्व्वदानृत्यकारके, त्रि ॥

सदानीरवहा, स्त्री, (वहतीति । वह + अच् । सदा सर्व्वदा नीरस्य वहा ।) करतोया नदी । इति शब्दरत्नावली ॥

सदानीरा, स्त्री, (सदा नीरं यस्याः ।) करतोया नदी । इत्यमरः ॥ गौरीविवाहसमये शङ्करकरगलितसम्प्रदानतोयप्रभवत्वात् करस्य तोयं विद्यते अत्रेति करतोया अर्श आदित्वादच् । श्रावणे एतद्वर्ज्जं सर्व्वा नद्यो रजस्वला इयन्तु न रजस्वला । अतएव सदा सर्व्वदा नीरमस्या इति सदानीरा । तथा च स्मृतिः ।

“अथादौ कर्कटे देवी त्र्यहं गङ्गा रजस्वला ।
सर्व्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी ॥”

इति भरतः ॥

(यथा, महाभारते । २ । २० । २७ ।

“गण्डकीञ्च सदानीरां शर्करावर्त्तमेव च ।
एकपर्व्वतके नद्यः क्रमेनैत्याव्रजन्तु ते ॥”

निरन्तरजलपूर्णे अम्बुजलपूर्णे च त्रि । यथा, आर्य्यासप्तशत्याम् । २२४ ।